॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय १२

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह ।
प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम् ॥ १॥

ममापि तु विवक्षास्ति का चित्प्रति विभीषणम् ।
श्रुतमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः ॥ २॥

मित्रभावेन सम्प्राप्तं न त्यजेयं कथं चन ।
दोषो यद्यपि तस्य स्यात्सताम् एतदगर्हितम् ॥ ३॥

रामस्य वचनं श्रुत्वा सुग्रीवः प्लवगेश्वरः ।
प्रत्यभाषत काकुत्स्थं सौहार्देनाभिचोदितः ॥ ४॥

किमत्र चित्रं धर्मज्ञ लोकनाथशिखामणे ।
यत्त्वमार्यं प्रभाषेथाः सत्त्ववान्सपथे स्थितः ॥ ५॥

मम चाप्यन्तरात्मायं शुद्धिं वेत्ति विभीषणम् ।
अनुमनाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ ६॥

तस्मात्क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव ।
विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ॥ ७॥

स सुग्रीवस्य तद्वाक्यं रामः श्रुत्वा विमृश्य च ।
ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम् ॥ ८॥

सुदुष्टो वाप्यदुष्टो वा किमेष रजनीचरः ।
सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथं चन ॥ ९॥

पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् ।
अङ्गुल्यग्रेण तान्हन्यामिच्छन्हरिगणेश्वर ॥ १०॥

श्रूयते हि कपोतेन शत्रुः शरणमागतः ।
अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ ११॥

स हि तं प्रतिजग्राह भार्या हर्तारमागतम् ।
कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ १२॥

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा ।
शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना ॥ १३॥

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् ।
न हन्यादानृशंस्यार्थमपि शत्रुं परं पत ॥ १४॥

आर्तो वा यदि वा दृप्तः परेषां शरणं गतः ।
अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥ १५॥

स चेद्भयाद्वा मोहाद्वा कामाद्वापि न रक्षति ।
स्वया शक्त्या यथातत्त्वं तत्पापं लोकगर्हितम् ॥ १६॥

विनष्टः पश्यतस्तस्य रक्षिणः शरणागतः ।
आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ १७॥

एवं दोषो महानत्र प्रपन्नानामरक्षणे ।
अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ १८॥

करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ।
धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ १९॥

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ २०॥

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ।
विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥ २१॥

ततस्तु सुग्रीववचो निशम्य तद्
धरीश्वरेणाभिहितं नरेश्वरः ।
विभीषणेनाशु जगाम सङ्गमं
पतत्रिराजेन यथा पुरन्दरः ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com